**Composer:** P.V.R. Narasimha Rao
**Date:** 2015 March 8

**Metre:** Toonaka (quiver of arrows)

**Verse:**

shrI raaghavaaShTakaM

bhAnuvaMshabhUShaNaM vibhaanumadvibhaasitaM| indulagnajAtamindusundaraM manoharaM|
kosalAdhipAtmajAsunandanaM kratUdbhavaM| raaghavaM videhajAmanoharaM sadA bhaje||

shrIvasiShThakaushikAdibodhitaM mahAmatiM | taaTakaadidaityakUTamardane kapardinaM|
aarShayaGYarakShakaM sushaktiyuktadhIvaraM | raaghavaM videhajAmanoharaM sadA bhaje||

maithilIswayaMvare pinAkatoDakaM dR^iDhaM | jaamadagnyadarpataaDakaM priyaMkaraM hariM |
jAnakImanoharaM dharAsutAhR^idaalayaM | raaghavaM videhajAmanoharaM sadA bhaje||

gautamaadipUjitaM jaTaayumuktidaayakaM | yogicittaraMjakaM praduShTadaityabhaMjakaM |
kIshavIrasaMghamArgadarshakaM sakhaM prabhuM | raaghavaM videhajAmanoharaM sadA bhaje||

setubandhakaM kapIshavR^indanaayakaM vibhuM| kumbhakarNameghanaathadaanavesha naashakaM|
vIravikramaM mahAparAkramaM ripuMjayaM| raaghavaM videhajAmanoharaM sadA bhaje||

lakShmaNaanugamyamAnamaMjanAsuteDitaM| jAmbavadvibhIShaNAdiveditaM niveditaM|
maunivR^indabhAvitaM niShevitaM suraarchitaM| raaghavaM videhajAmanoharaM sadA bhaje||

tyAgashIlinaM ca raajadharmavartakaM prabhuM| jaanakIpriyAviyogapIDitaM narottamaM|
valmikodbhaveDitaM tanUjayugmavatsalaM| raaghavaM videhajAmanoharaM sadA bhaje||

aadipUruShaM hariM varaM paraM paraatparaM| vAyusUnusevitaM mahaarihaM mahaamahaM|
brahmarudravaasavaadisevitaaMghrivaarijaM| raaghavaM videhajAmanoharaM sadA bhaje||

shrI rAghavaaShTakaM puNyaM ye japanti narottamaaH|
te sarve muktimaayaantu raamachandra prasaadataH ||

## श्री राघवाष्टकं

भानुवंशभूषणं विभानुमद्विभासितं। इन्दुलग्नजातमिन्दुसुन्दरं मनोहरं।
कोसलाधिपात्मजासुनन्दनं क्रतूद्भवं। राघवं विदेहजामनोहरं सदा भजे॥

श्रीवसिष्ठकौशिकादिबोधितं महामतिं । ताटकादिदैत्यकूटमर्दने कपर्दिनं।
आर्षयज्ञरक्षकं सुशक्तियुक्तधीवरं । राघवं विदेहजामनोहरं सदा भजे॥

मैथिलीस्वयंवरे पिनाकतोडकं दृढं । जामदग्न्यदर्पताडकं प्रियंकरं हरिं ।
जानकीमनोहरं धरासुताहृदालयं । राघवं विदेहजामनोहरं सदा भजे॥

गौतमादिपूजितं जटायुमुक्तिदायकं । योगिचित्तरंजकं प्रदुष्टदैत्यभंजकं ।
कीशवीरसंघमार्गदर्शकं सखं प्रभुं । राघवं विदेहजामनोहरं सदा भजे॥

सेतुबन्धकं कपीशवृन्दनायकं विभुं। कुम्भकर्णमेघनाथदानवेश नाशकं।
वीरविक्रमं महापराक्रमं रिपुंजयं। राघवं विदेहजामनोहरं सदा भजे॥

लक्ष्मणानुगम्यमानमंजनासुतेडितं। जाम्बवद्विभीषणादिवेदितं निवेदितं।
मौनिवृन्दभावितं निषेवितं सुरार्चितं। राघवं विदेहजामनोहरं सदा भजे॥

त्यागशीलिनं च राजधर्मवर्तकं प्रभुं। जानकीप्रियावियोगपीडितं नरोत्तमं।
वल्मिकोद्भवेडितं तनूजयुग्मवत्सलं। राघवं विदेहजामनोहरं सदा भजे॥

आदिपूरुषं हरिं वरं परं परात्परं। वायुसूनुसेवितं महारिहं महामहं।
ब्रह्मरुद्रवासवादिसेवितांघ्रिवारिजं। राघवं विदेहजामनोहरं सदा भजे॥

श्री राघवाष्टकं पुण्यं ये जपन्ति नरोत्तमाः।
ते सर्वे मुक्तिमायान्तु रामचन्द्र प्रसादतः ॥